केवल अभ्यास हेतु नमूना प्रश्न पत्र
हाईस्कूल परीक्षा– 2026
विषय– संस्कृत

| Total Question | Total Printed Pages | Time | Maximum Marks |
|---|---|---|---|
| 23 | 05 | घण्टात्रयम् | पूर्णाङ्काः – 75 |

निर्देशाः – 1. सर्वे प्रश्नाः समाधेयाः।
2. प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।
3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि।
4. प्रश्नक्रमांक- 01 तः 05 पर्यन्तम् 30 वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकप्रश्नाय अङ्कमेकं (01) निर्धारितम् ।
5. प्रश्नक्रमांक- 06 तः 17 पर्यन्तम् 12 प्रश्नाः सन्ति। प्रत्येकप्रश्नाय अङ्कद्वयं (02) निर्धारितम् ।
6. प्रश्नक्रमांक- 18 तः 20 पर्यन्तम् 03 प्रश्नाः सन्ति। प्रत्येकप्रश्नाय अङ्कत्रयं (03) निर्धारितम् ।
7. प्रश्नक्रमांक- 21 तः 23 पर्यन्तम् 03 प्रश्नाः सन्ति। प्रत्येकप्रश्नाय अङ्कचतुष्टयं (04) निर्धारितम् ।

1. उचितविकल्पं चित्वा लिखत – **1 × 6 = 6**

I “बालकः” इत्यस्मिन् पदे वचनम् अस्ति –
(अ) एकवचनम् (ब) द्विवचनम्
(स) बहुवचनम् (द) अन्यवचनम् ।

II "लताम्" इत्यस्मिन् पदे विभक्तिः अस्ति –
(अ) प्रथमा (ब) द्वितीया
(स) चतुर्थी (द) षष्ठी ।

III “कवि” शब्दस्य सप्तमी विभक्तेः रुपम् अस्ति –
(अ) कविम् (ब) कविभिः
(स) कविषु (द) कवेः ।

IV “राज्ञः” पदे कः विभक्तिः अस्ति –
(अ) षष्ठी (ब) पञ्चमी
(स) तृतीया (द) चतुर्थी ।

V अधोलिखितेषु शब्देषु अव्ययं पदं नास्ति –
(अ) अत्र (ब) यत्र
(स) सर्वत्र (द) पत्र

VI “सदाचारः एव परमो धर्मः” । अस्मिन् वाक्ये अव्ययम् अस्ति –
(अ) परमो (ब) धर्मः
(स) एव (द) सदाचारः ।

2. शुद्धवाक्यानां समक्षम्“आम्” अशुद्धवाक्यानां समक्षं “न” इति लिखत – **1 × 6 = 6**

I “पठिष्यति” इत्यस्मिन् पदे लट्लकारः अस्ति ।
II “पिबानि” इत्यस्मिन् पदे उत्तमपुरुषः अस्ति ।
III “गच्छति” इत्यस्मिन् पदे एकवचनम् अस्ति ।
IV “निरपराधः” इत्यस्मिन् पदे निस् उपसर्गः अस्ति ।
V “संस्कृतः” इत्यस्मिन् पदे सम् उपसर्गः अस्ति ।
VI “अभवत्” इत्यस्मिन् पदे लोट्लकारः अस्ति ।

3. युग्ममेलनं कुरुत – **1 × 6 = 6**

| (अ) | | (ब) |
|---|---|---|
| 1. प्रतिगृहम् | ( I ) | विसर्गसन्धिः |
| 2. पीताम्बरः | ( II ) | दीर्घसन्धिः |
| 3. पदातिरेव | ( III ) | अव्ययीभावसमासः |
| 4. भोजनान्ते | ( IV ) | बहुब्रीहिसमासः |
| 5. पितरौ | ( V ) | नोत्थितः |
| 6. न+उत्थितः | ( VI ) | द्वन्द्वसमासः |

4. एकपदेन उत्तरं लिखत – **1 × 6 = 6**

I अतिथिः केन प्रबुद्धः ?

II अहं कस्मै जीवनं कामये ?

III मनुष्याणां महान् रिपुः कः ?

IV “खादितुम्” इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

V “गतः” इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

VI “गुणवान्” इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

5. प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत – **1 × 6 = 6**

(स्पर्शः , जलम् , दुर्वहम् , पुरा , भार्या , दुर्बले)

I “सलिलम्” इत्यस्य पदस्य . . . . . . . पर्यायः भवति ।

II “सुकरम्” इत्यस्य पदस्य . . . . . . . विलोमपदं भवति ।

III “अधुना” इत्यस्य पदस्य . . . . . . . विलोमपदं भवति ।

IV “हृदयग्राही स्पर्शः” इत्यस्मिन् पदयोः . . . . . . . . . . .विशेष्यपदम् अस्ति ।

V “दुर्बले सुते” इत्यस्मिन् पदयोः . . . . . . . . . . .विशेषणपदम् अस्ति ।

VI “पत्नी” इत्यस्य पदस्य . . . . . . . पर्यायः भवति ।

( प्रश्न क्रमांक 6 तः 10 पर्यन्तं प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत – )

6. कविः कुत्र सञ्चरणं कर्तुम् इच्छति ? **2**

अथवा

अन्ते प्रकृतिमाता प्रविश्य सर्वप्रथमं किं वदति ?

7. व्याघ्रः किं विचार्य पलायितः ? **2**

अथवा

रामः लवकुशौकुत्र उपवेशयितुम् कथयति ?

8. जननी कीदृशी भवति ? **2**

अथवा

वृष्टिभिः वसुधां के आर्द्रयन्ति ?

9. समग्रं विश्वं कैः आतङ्कितः दृश्यते ? **2**

अथवा

नराणां प्रथमः शत्रुः कः ?

10. निर्धनः जनः कथं वित्तम् उपार्जितवान् ? 2

अथवा

प्राणेभ्योऽपि कः रक्षणीयः ?

11. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य पुस्तकस्य एकं सुभाषितं लिखत । 2

12. अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत – 1/2 × 4=2

(क) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत् ।

(ख) रे रे धूर्त त्वया मह्यं पुरा व्याघ्रत्रयं दत्तम्।

(ग) मार्गे सा एकं व्याघ्रं अपश्यत् ।

(घ) बुद्धिमती चपेटया पुत्रौ प्रहृतवती ।

13. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – (कौ द्वौ) 1 × 2=2

(क) त्वं <u>मानुषात्</u> विभेषि।

(ख) मयूरस्य नृत्यं <u>प्रकृतेः</u> आराधना।

(ग) <u>धेनूनाम्</u> माता सुरभिः आसीत् ।

14. अधोलिखितानि वाक्यानि कः कं प्रति कथयति – (कौ द्वौ) 1 × 2=2

| | कः | कं प्रति |
|---|---|---|
| (क) अहं वनराजः, किं भयं न जायते ? | ........... | ............. |
| (ख) भवान् कुतः भयात् पलायितः ? | ........... | ............. |
| (ग) यतः मम नृत्यं तु प्रकृतेः आराधना । | ........... | ............. |

15. अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः – (कौ द्वौ) 1 × 2=2

(क) गुरूं नमः ।

(ख) सः मोदकं खादसि ।

(ग) सैनिकः अश्वेन पतति ।

16. रिक्तस्थानानि पूरयत – (केऽपि चत्वारः) 1/2 × 4=2

(क) उलूकः ...... पदनिलिप्तः चासीत् ।

(ख) तत्र राजसिंहः नाम ...... वसति स्म ।

(ग) संपत्तौ च ....... च महतामेकरूपता ।

(घ) अत्र ....... दुर्वहम् अस्ति ।

(ङ) गुणी ....... जानाति।

17. वाच्यपरिवर्तनं कुरुत – (कौ द्वौ) 1 × 2=2

(क) कः छायां निवारयति । (कर्मवाच्ये)

(ख) तेन एव वह्निना शरीरं दह्यते । (कर्तृवाच्ये)

(ग) बालकः पुस्तकं पठति । (कर्मवाच्ये)

18. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 3

"भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि । सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न?" इति प्रत्यवोचत्।

"भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?" इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्।

प्रश्नाः –

(क) कस्य दैन्यं दृष्ट्वा सुरभिः रोदिति ?

(ख) कति पुत्रेषु सत्स्वपि तव अस्मिन् प्रीतिः अस्ति ?

(ग) सः किं वोढुं न शक्नोति ?

अथवा

ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते इति कथयन्ति भूकम्पविशेषज्ञाः। पृथिव्याः गर्भे विद्यमानोऽग्निः यदा खनिजमृत्तिकाशिलादिसञ्चयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या धरां पर्वतं वा विदार्य बहिर्निष्क्रामति। धूमभस्मावृतं जायते तदा गगनम्।

प्रश्नाः –

(क) केषां विस्फोटैरपि भूकम्पो जायते ?

(ख) कस्याः गर्भे अग्निः विद्यमानः ?

(ग) तदा गगनं कीदृशं जायते ?

19. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – **3**

रे रे चातक! सावधानमनसा मित्र! क्षणं श्रूयतां–
मम्भोदा बहवो भवन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।

प्रश्नाः –

(क) सर्वेऽपि कुत्र नैतादृशाः ?

(ख) कां केचिद् वृष्टिभिरार्द्रयन्ति ?

(ग) गगने बहवः के सन्ति ?

अथवा

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।

प्रश्नाः –

(क) पिता पुत्राय बाल्ये किं यच्छति ?

(ख) पिताऽस्य किं तपस्तेपे इत्युक्तिः का ?

(ग) पिता कस्मै बाल्ये विद्याधनं यच्छति ?

20. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – **3**

पिकः – (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रुपम्, न ध्वनिरस्ति। कृष्णवर्णम् मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?

काकः – अरे! अरे! किं जल्पसि ? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा – "अनृतं वदसि चेत् काकः दशेत्" – इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम्। अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

पिकः – अलम् अलम् अतिविकत्थनेन। किं विस्मर्यते यत्–
काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः।।

प्रश्नाः –

(क) कदा काकः काकः पिकः पिकः ?

(ख) न रूपम् न ध्वनिरस्ति इति कः कथयति ?

(ग) काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते ?

अथवा

विदूषकः – इत इत आर्यौ!

कुशलवौ – (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य ?

रामः – युष्मद्दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य (परिष्वज्य) अहो हृदयग्राही स्पर्शः।

उभौ – राजासनं खल्वेतत्, न युक्तमध्यासितुम्।

रामः – सव्यवधानं न चारित्रलोपाय। तस्मादङ्क – व्यवहितमध्यास्यतां सिंहासनम्।

प्रश्नाः –

(क) कुशलवौ कम् उपसृत्य प्रणमतः ?

(ख) तस्मादङ्क – व्यवहितमध्यास्यतां कुत्र ?

(ग) किं चरित्रलोपाम न भवति ?

21. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (कोऽपि चत्वारः) **4**

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। जन्मभूमि स्वर्गात् उत्कृष्ट्तरः अस्ति। वैदिक ऋषिः कथयति– माता भूमिः पुत्रोऽयं पृथिव्या। अतः अस्माभिः स्वार्थं परित्यज्य देशस्य देशवासिना च सेवा सततं करणीया। वयं राष्ट्रभावां, राष्ट्रीयचरित्रं, त्यागभावानां, विना राष्ट्रस्य संरक्षणं कर्तुं न पारयामः।

प्रश्नाः –

(क) कस्मात् जननी जन्मभूमिश्च गरीयसी ?

(ख) केषां विना राष्ट्रस्य संरक्षणं कर्तुं न पारयामः ?

(ग) माता भूमिः इति कः कथयति ?

(घ) जन्मभूमि कस्मात् उत्कृष्ट्तरः अस्ति ?

(ङ) अस्माभिः किं परित्यज्य देशस्य सेवा सततं करणीया ?

22. स्वभगिन्याः विवाहे आमन्त्रयितुं स्वमित्रं प्रति पत्रं लिखत । **4**

अथवा

स्वप्राचार्यस्य कृते शुल्कमुक्त्यर्थम् एकं प्रार्थनापत्रं लिखत ।

23. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु निबन्धं लिखत – **4**

(क) मम प्रिय कविः ,

(ख) आचारः परमो धर्मः ,

(ग) प्रिय मे भारतम् ,

(घ) अस्माकं प्राचीनतमा भाषा ।

---XXX---